RKMVERI/DSS/MAIS/15-20/J2018/UT-1/SK-131

**SK-131 — ब्रह्मसूत्रभाष्यम् (प्रथमाध्यायस्य प्रथमद्वितीयपादौ)**

कालावधिः - होरा | पूर्णाङ्काः - 25

---

**A) एषु यथाकामं सप्त प्रश्नान् उत्तरत। 1x07=07**

1) अध्यासलक्षणं लिखत।
2) सर्वेवेदान्ताः किमर्थमारभ्यन्ते?
3) मिथ्याज्ञानमित्यस्य कः अर्थः?किमाकारञ्च तत्?
4) जन्माद्यधिकरणस्य पूर्वाधिकरणेन सङ्गतिः का? किमर्था च सा?
5) सन्वाच्यायाः इच्छायाः कर्म किम्? किमर्थञ्च तत्?
6) विप्रतिपत्तिः का? भाष्यकारेण प्रदर्शितासु विप्रतिपत्तिषु विप्रतिपत्तिद्वयं लिखत।
7) पुरूषबुद्धिसहाय्यमात्मनः का श्रुतिः दर्शयति?

**B) एतेषु यथाच्छन्दं चत्त्वारि समाधत्त। 3x4=12**

1) ब्रह्मणः इति कर्मणिषष्ठीति विचारयत।
2) जिज्ञासासूत्रस्थम् अथशब्दार्थं यथाभाष्यं विचारयत।
3) श्रुतेः तर्कसापेक्षत्वं व्याख्यात।
4) अस्य जगतः नामरूपाभ्यां व्याकृतस्य इत्यादि वाक्यं यथाभाष्यं विवृणुत।
5) जन्माद्यस्य यतः इति सूत्रार्थं वर्णयत।
6) भूतं वस्तु प्रमाणान्तरगम्यमेवेति मतं खण्डयत।
7) ब्रह्मप्रसिद्धमुताप्रसिद्धमिति आशङ्क्य यथाग्रन्थं प्रतिपादयत।

**C) अनयोः एकं विशदयत। 1x6=06**

1) अध्यासभाष्यसारं संगृह्णीत।
2) जन्मादि सूत्रं नानुमानोपन्यासार्थमिति विवेचयत।

***

## SK-161 – वेदान्तसारः

कालावधिः - होरा | पूर्णाङ्काः - 25

---

**A) अत्र यथाकामं सप्त प्रश्नान् उत्तरत।** **1x7=7**

1) अखण्डमिति शब्दार्थं यथापाठं लिखत।
2) वेदान्तशब्दार्थं विवृणुत।
3) साधनानि कानि लिखत।
4) सच्चिदानन्दं शब्दस्य यथाग्रन्थम् अर्थं गमयत।
5) तरति शोकमात्मविदित्यत्र शोकशब्दार्थः कः?
6) समित्पाणिः इत्यस्य कः अर्थः?
7) वेदान्तानां प्रयोजनं किम्?

**B) अधोलिखितेषु यथाच्छन्दं चत्त्वारि समाधत्त।** **3x4=12**

1) साधनेषु षट्कसम्पत्तिः।
2) विषयसम्बन्धयोः स्वरूपमुक्त्वा तयोः सम्बन्धं गमयत।
3) अधिकारीलक्षणं यथाग्रन्थं निरूपयत।
4) नित्यान्यकरणे प्रत्यवायसाधनानि ….. व्याख्यात।
5) प्रयोजनं निर्दिश्य गुरूपसदनविधिं व्याख्यात।
6) प्रशान्तचित्ताय इत्यादि श्लोकार्थं यथाग्रन्थं गमयत।

**C) अनयोः एकं विशदयत।** **1x6=06**

1) कर्मभेदमुक्त्वा फलभेदं मीमांस्य कर्मानुष्ठानविषयम् ऊहापोहपूर्वकं विशदयत।
2) अनुबन्धचतुष्टयं यथाग्रन्थं निरूपयत।

***

## SK-161 – वेदान्तसारः

कालावधिः - होरा पूर्णाङ्काः - 25

---

**A) द्वादशसु दश समाधत्त। 1x10=10**

1) वेदान्तसार-ग्रन्थस्य प्रणेता कः?
2) वेदान्तसारः वेदान्तशास्त्रस्य कीदृशः ग्रन्थः?
3) वेदान्तसार-ग्रन्थस्य मङ्गलश्लोके कस्य स्तुति विहिता ग्रन्थकारेण?
4) उपासनानां परं प्रयोजनं किम्?
5) दमः कः?
6) वेदान्तस्य विषयः कः?
7) वेदान्तो नाम किम्?
8) अद्वयानन्दः कः?
9) कर्मणा किम् प्राप्यते?
10) अनुबन्धः कति विधः के च ते?
11) पापक्षयसाधनानि कानि?
12) वेदान्तशास्त्रस्य प्रयोजनं किम्?

RKMVERI/DSS/Int MA/15-20/J2018/UT-1/SK-213

## SK-213 सिद्धान्तकौमुद्यां समासप्रकरणम्।

कालावधिः - एकहोरा | पूर्णाङ्काः - 25

---

**A) अष्टसु षट् समाधेयाः। 1*6=6**

1) साग्नि इत्यस्य लौकिकविग्रहं लिखत।
2) यावच्छ्लोकम् इत्यत्र केन सूत्रेण समासः।
3) अस्वपदलौकिकविग्रहः कस्य समासस्य भवति।
4) विभाषा इति कीदृशं सूत्रम् अस्ति।
5) समृद्धिः, संपत्तिः इत्यनयोः कः अर्थः।
6) वृक्षं वृक्षं प्रति विद्योतते विद्युत् इत्यत्र प्रतिशब्दस्य कः अर्थः।
7) परिविष्णु इत्यस्य लौकिकविग्रहं लिखत।
8) आमुक्ति संसारः इत्यत्र केन सूत्रेण समासः।

**B) पञ्चसु त्रयं समाधत्त। 3*3=9**

1) अतिहमम् इत्यस्य ससूत्रं सिद्धिः कार्या।
2) अनुरूपम् इत्यस्य ससूत्रं सिद्धिं लिखत।
3) ससखि इत्यस्य ससूत्रं सिद्धिः कार्या।
4) शलाकापरि इत्यस्य ससूत्रं सिद्धिः कार्या।
5) उपसर्जनम् पूर्वम् इति सूत्रं सोदाहरणं व्याख्यात।

**C) त्रिषु द्वयं समाधत्त। 5*2=10**

1) निर्मक्षिकम्, अधिविद्यम् इत्यनयोः कस्यचिदेकस्य ससूत्रं साधनं कुरुत।
2) प्रथमानिर्दिष्टं समास उपसर्जनम् इति सूत्रं सोदाहरणं व्याख्यात।
3) गोस्त्रियोरुपसर्जनस्य इति सूत्रं सोदाहरणं व्याख्यात।

RKMVERI/DSS/WW/Int MA/15-20/J2018/UT-1/SK-213

## SK-213 सिद्धान्तकौमुद्यां समासप्रकरणम्।

कालावधिः - एकहोरा | पूर्णाङ्काः - 25

---

**A) अष्टसु षट् समाधेयाः।** **1x6=6**

1) यथाशक्ति इत्यस्य लौकिकविग्रहं लिखत।
2) यथार्थाः के सन्ति।
3) अत्ययः इत्यस्य कः अर्थः।
4) उपसर्जनसंज्ञाविधायकं सूत्रं लिखत।
5) समृद्धिः इत्यस्य कः अर्थः।
6) संपत्तिः इत्यस्य कः अर्थः।
7) इतिहरि इत्यस्य लौकिकविग्रहं लिखत।
8) अनुविष्णु इत्यस्य लौकिकविग्रहं लिखत।

**B) पञ्चसु त्रयं समाधत्त।** **3x3=9**

1) अधिहरि इत्यस्य ससूत्रं सिद्धिः कार्या।
2) दुर्यवनम् इत्यस्य ससूत्रं सिद्धिं लिखत।
3) सहरि इत्यस्य ससूत्रं सिद्धिः कार्या।
4) शाकप्रति इति प्रयोगं ससूत्रं साधयत।
5) सुपो धातुप्रातिपदिकयोः इति सूत्रस्य सोदाहरणं व्याख्या लेख्या।

**C) त्रिषु द्वयं समाधत्त।** **5x2=10**

1) उपकृष्णम्, अधिगोपम् इत्यनयोः कस्यचिदेकस्य सिद्धिः लेख्या।
2) सचक्रम्, अपदिशम् इत्यनयोः कस्यचिदेकस्य सिद्धिः लेख्या।
3) सह सुपा इति सूत्रं सोदाहरणं व्याख्यात।

RKMVERI/DSS/Int MA/14-19/D2014/UT-1/SK-216

## SK-216 सिद्धान्तकौमुद्याम् तद्धितप्रकरणे अपत्याधिकारात् प्राग्वहतीयं यावत्

समयावधिः - एकहोरा | पूर्णाङ्काः - 25

---

**A) अत्र यथेष्टं पञ्चानां प्रश्नानाम् एकेन वाक्येन उत्तरं लिखत- 1x5=5**

1) सामर्थ्यं नाम किम्।
2) कालेयम् केन सूत्रेण कः प्रत्ययः।
3) एको गोत्रे इति कीदृशं शास्त्रम्।
4) सापत्नः इति रूपं कथम्।
5) दाण्डिनायनहास्तिनायन.....इति सूत्रं पूरयत।
6) अणो द्व्यचः इति सूत्रेण विधीयमानः फिञ्प्रत्ययः कस्य अपवादभूतः।

**B) एषु यथेष्टं प्रश्नद्वयस्य व्याख्यानं कुरुत। 5x2=10**

1) गोत्रेऽलुगचि' इति सूत्रं व्याख्यात।
2) वान्यस्मिन्सपिण्डे स्थविरतरे जीवति इति सूत्रं व्याख्यात।।
3) गोत्रे स्वैनकोनसंख्यानाम्...इत्यादिश्लोकं पूरयित्वा व्याख्यात।

**C) निम्नलिखितेषु यथेष्टं एकस्य प्रश्नस्य उत्तरं लिखत। 10x1=10**

1) समर्थानां प्रथमाद्वा इति सूत्रं व्याख्यात।
2) तस्यापत्यम् इति सूत्रं व्याख्यात।

RKMVERI/DSS-WW/Int MA/16-19/J2018/UT-1/SK-227

## SK-227 लघुसिद्धान्तकौमुद्यां कृत्यप्रकरणात् कृदन्तप्रकरणं यावत्

समयावधिः-एकहोरा, सत्रम् ८ पूर्णाङ्काः-२५

---

### A) दश समाधेयाः १ x १० = १०

1) कृत्यप्रत्ययाः कति?
2) तयोरेव कृत्यक्तखलर्थाः इति सूत्रस्य अर्थं लिखत।
3) बाहुलकम् इत्यस्य कोऽर्थः?
4) स्नानीयं चूर्णम् इत्यस्य विग्रहः कः?
5) शप्यम् इत्यत्र कः प्रत्ययः केन सूत्रेण?
6) स्तुत्यः इत्यत्र तुगागमः केन सूत्रेण?
7) धार्यम् इत्यत्र कः धातुः कश्च प्रत्ययः?
8) ऋहलोर्ण्यत् इति सूत्रस्य अर्थः कः?
9) युवोरनाकौ इति सूत्रस्य अर्थः कः?
10) किरः इत्यत्र कः धातुः कश्च प्रत्ययः?
11) आतश्चोपसर्गे इत्यस्य अर्थं लिखत।
12) गृहम् इत्यत्र कः धातुः कश्च प्रत्ययः?

### B) यथाभीष्टे द्वे रूपे साधयत २.५ x २ = ५

1) शिष्यः 2) मार्ग्यः 3) कारकः

### C) यथाभीष्टम् एकं व्याख्यात १० x १ = १०

1) वाऽसरूपोऽस्त्रियाम् इति व्याख्यात।
2) कृत्यप्रत्ययानां विषये लघुं निबन्धं लिखत।

RKMVERI/DSS/Int MA/17-22/J2018/UT-1/SK-237

**SK-237 लघुसिद्धान्तकौमुद्यामजन्तस्त्रीलिङ्गादारभ्य अव्ययप्रकरणं यावत्, स्त्रीप्रत्ययश्च।**

कालावधिः - एकहोरा, पूर्णाङ्काः - 25

---

**A) अष्टसु षट् समाधेयाः।** **1*6=6**

1) मतिशब्दस्य द्वितीयाबहुवचने किं रूपं भवति।
2) औङ् इति कस्य संज्ञा।
3) आङ् इति कस्य संज्ञा।
4) दुर्गाशब्दस्य चतुर्थ्येकवचने किं रूपं भवति।
5) हे रमे इत्यत्र सम्बुद्धिलोपः केन सूत्रेण भवति।
6) हे अक्क इत्यत्र ह्रस्वः केन सूत्रेण भवति।
7) गोपाशब्दस्य द्वितीयाबहुवचने किं रूपं भवति।
8) बुद्धिशब्दस्य पञ्चम्येकवचने किं रूपं भवति।

**B) पञ्चसु त्रयं समाधत्त।** **3*3=9**

1) रमया इत्यस्य ससूत्रं सिद्धिः कार्या।
2) रमायाः इत्यस्य ससूत्रं सिद्धिं लिखत।
3) रमयोः इत्यस्य ससूत्रं सिद्धिः लेख्या।
4) सर्वासाम् इत्यस्य ससूत्रं सिद्धिं प्रदर्शयत।
5) जरसौ इत्यस्य ससूत्रं सिद्धिः कार्या।

**C) त्रिषु द्वयं समाधत्त।** **5*2=10**

1) रमायाम्, सर्वस्याम् इत्यनयोः कस्यचिदेकस्य सिद्धिः कार्या।
2) सर्वस्यै, सर्वस्याः इत्यनयोः कस्यचिदेकस्य सिद्धिः विधेया।
3) औङः आपः इति सूत्रं सोदाहरणं व्याख्यात।

RKMVU/DSS/Int MA/13-18/J2018/UT-1/SK-268

## SK-268 लघुशब्देन्दुशेखरे स्त्रीप्रत्ययाव्ययीभावप्रकरणे।

कालावधिः - एकहोरा पूर्णाङ्काः - 25

---

**D) सप्तसु पञ्चैव समाधेयाः।** **1x5=5**

1) शूद्रा चामहत्पूर्वा जातिः इति कस्यापवादः।
2) चटका इत्यत्र इत्वं कुतो न।
3) लिङ्गस्य लौकिकं लक्षणं लिखत।
4) लिङ्गस्य शास्त्रीयं लक्षणं लिखत।
5) प्रत्ययस्थात्....इतिसूत्रघटके असुपः इति पदे कः नञ्समासः।
6) प्रत्ययस्थात्....इति सूत्रे स्थग्रहणस्य किं फलम्।
7) सन्निपातपरिभाषायाः अनित्यत्वे किं प्रमाणम्।

**E) त्रिषु द्वयं समाधत्त।** **5x2=10**

1) उगितश्च इति सूत्रस्य व्याख्यां लिखत।
2) डाबुभाभ्यामन्यतरस्याम् इति सूत्रं व्याख्यात।
3) अन उपधालोपिनोऽन्यतरस्यमाम् इति सूत्रं व्याकरोतु।

**F) द्वयोरेकं समाधत्त।** **1x10=10**

1) अजाद्यतष्टाप् इति सूत्रस्य यथाग्रन्थं व्याख्यां प्रतिपादयत।
2) अनेन वर्णमात्रं विवक्षितम्, अकार उच्चारणार्थः इति ग्रन्थस्याशयं प्रकाशयत।

RKMVERI/DSS/MAIS/14-19/J2018/UT-1/SK-301

## SK-301 – निरुक्तम्

कालावधिः - होरा                      पूर्णाङ्काः - 25

---

**A) एकेन वाक्येन उत्तरत।** **1x6=6**

1) निपातस्य निर्वचनं कथम्।
2) अदः इति केषाम् उपदेशः।
3) यत्र उभे ते किं प्रधाने भवतः।
4) निरुक्ते उपेक्षापदस्य कोऽर्थः।
5) स्वाङ्गाभ्युच्चयस्य किम् उदाहरणम्।
6) वेदे कर्मसम्पत्तिः कः।
7) को भावः तत्त्वात् विकारमाचष्टे।

**B) समासेन विवृणुत।** **3.5x4=14**

1) निघण्टुपदस्य अर्थं निरूपयत।
2) वचनम् इन्द्रियनित्यमिति औदुम्बरयणमतं निरूपयत।
3) नञः अनेकार्थत्वं प्रदर्शयत।
4) चिदित्येष अनेकार्थकः, निरूपयत।
5) षण्णामुपसर्गाणाम् अर्थान् सोदाहरणं प्रदर्शयत।
6) नु इत्येष अनेकार्थकः, दर्शयत।

**C) एकं प्रपञ्चयत।** **1x5=5**

1) चत्वारि पदजातानि।
2) षट् भावविकाराः।

## SK-345 – न्यायसिद्धन्तमुक्तावल्याम् अनुमानखण्डः शब्दखण्डश्च

कालावधिः - होरा  पूर्णाङ्काः - 25

---

**A) अधो लिखितेषु यथाकामं पञ्च प्रश्नान् उत्तरत।**  **1x5=05**

1) व्यापारस्य किं लक्षणम् ?
2) प्राचीनमते अनुमितिकरणं किम् ?
3) व्याप्तिज्ञानपक्षधर्मताज्ञानयोरेव कारणत्वे तयोर्द्वयोः केन रूपेण कारणता?
4) पूर्वपक्षव्याप्तौ हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वं कस्य विशेषणम्?
5) रूपत्वव्याप्यजातिमद्वान् पृथिवीत्वादित्यत्राव्याप्तिवारणाय कीदृशं लक्षणं करणीयम्?
6) कः सम्बन्धः हेतुतावच्छेदकः कश्च सम्बन्धः साध्यतावच्छेदकः?
7) पूर्वपक्षव्याप्तिपरित्यागस्य कारणं किम्?

**B) अत्र यथाच्छन्दं चत्वारि समाधत्त।**  **4x5=20**

1) पर्वतो वह्निमान् धूमाद् इत्यत्रानुमितिक्रमं दर्शयत।
2) परामर्शस्य स्वीकारे मानं प्रतिपादयत।
3) पूर्वपक्षव्याप्तेः लक्षणं ससमन्वयं प्रदर्श्य साध्यतावच्छेदकसम्बन्धप्रवेशस्य प्रयोजनं निरूपयत।
4) पूर्वपक्षव्याप्तौ साध्यवत्त्वेतरधर्मानवच्छिन्नपदस्य हेतुतावच्छेदकसम्बन्धावच्छिन्नपदस्य च प्रयोजनं प्रदर्शयत।
5) सिद्धान्तव्याप्तौ अनवच्छेदकत्वानुसरणप्रयोजनं प्रदर्शयत।
   सिद्धान्तव्याप्तौ हेतुतावच्छेदकसम्बन्धेन हेतुतावच्छेदकविशिष्टाधिकरणं किमर्थं वाच्यम्?

RKMVERI/DSS/Int MA/13-18/J2018/UT-1/SK-371

## SK-371 – व्युत्पत्तिवादे प्रथमाकारके भेदान्वयभागः

कालावधिः - होरा पूर्णाङ्काः - 25

---

**A) अधोनिर्दिष्टेषु यथाकामं पञ्च प्रश्नान् उत्तरत। 1x5=05**

1) निपातातिरिक्त......अव्युत्पन्नत्वात् ?
2) न्यायमते विध्यर्थः कः?
3) केचिद् इत्यस्य मते कस्य हेतुत्वकल्पनाद् राजा पुरुषः इत्यत्र भेदान्वयवारणम्?
4) राज्ञः इत्यत्र ङ्-पदजन्योपस्थितौ कः प्रकारः ?
5) स्वत्वसम्बन्धस्य प्रतियोगितानवच्छेदकत्वं कुतः?
6) संसर्गतावादिमते तण्डुलं पचति इत्यत्र कस्य केन सम्बन्धेन कुत्र अन्वयः?
7) प्रकारतावादिमते राजपुरुषः इति समासस्थले कथमभेदान्वयबोधः ?

**B) निर्दिष्टेषु यथाच्छन्दं चत्त्वारि समाधत्त। 4x5=20**

1) निपातातिरिक्त.....अव्युत्पन्नत्वाद् इति नियमे प्रयोजकं प्रदश्र्य दलकृत्यञ्च प्रदर्शयत।
2) अत्र केचिद् इति रीत्या राजा पुरुषः इत्यत्र भेदान्वयापत्तिं निवार्य तत्र न्यूनतां प्रदर्शयत।
3) अथैतादृशरीत्यापत्तिवारणे राज्ञः पुरुषः इत्यादौ स्वत्वादिसम्बन्धेन पुरुषादौ राजाद्यन्वयबोधस्वीकारेऽपि क्षतिविरहादुक्तव्युत्पत्तिर्निर्युक्तिका इति पङ्क्तेराशयः स्फोरणीयः।
4) राजपुरुष इत्यादिसमासे राजादिपदस्य राजसम्बन्ध्यादिलक्षणास्वीकारः कथं व्यर्थः?
5) मैवम्, राज्ञः पुरुषः इत्यादौ षष्ठ्यादेः स्वत्वादिवाचकत्वमावश्यकम्, अन्यथा पुरुषो न राज्ञः इत्यादौ.....इत्यस्याः पङ्क्तेः व्याख्यानं कुरुत ।

वृत्त्यनियामकसम्बन्धस्याभावप्रतियोगितावच्छेदकत्वेपि राज्ञः पुरुषः इत्यादौ राजस्वत्वादेः प्रकारताभ्युपगमः समुचितः, अन्यथा......इति पङ्क्तेराशयं प्रतिपादयत।

RKMVERI/DSS/MAIS/17-22/J2018/UT-1/SK-401

## SK-401 – अलंकारशास्त्रोपकण्ठम्

कालावधिः - होरा                                                                                    पूर्णाङ्काः - 25

---

**A) एकेन वाक्येन उत्तरत।**                                                                              **1x10=10**

1) केन कवेः कर्म धन्यं भवति?
2) कः काव्यप्रयोजनं निर्विघ्नं लभते?।
3) किमर्थं परमात्मा कविरिति स्तूयते?
4) प्रतिभाचक्षुः इत्यत्र विग्रहः कथम्?
5) कवेः काव्यनिर्माणे सर्वस्वं किम्?
6) सहृदयशब्दस्य कोऽभिप्रायः?
7) को नाम ऋषिः?
8) काव्यात् पापक्षयः इत्येतत् कथम्?
9) गङ्गायां घोषः इत्यत्र का लक्षणा?
10) का नाम वृत्तिः?
11) जगत् कस्य साधनम्?
12) चत्वारः अनुबन्धाः के?

**B) संक्षेपेण विवृणुत।**                                                                                   **3x5=15**

1) दर्शनवर्णनयोः अर्थं स्पष्टीकुरुत।
2) अलंकारशास्त्राधिकारी कः?
3) काव्ये बोधमोदयः कतरः प्रधानः?
4) काव्यस्य कारणं विवृणुत।
5) भामहस्य काव्यलक्षणं विवृणुत।
6) काव्यं कान्तासम्मितं कुतः उच्यते?
7) काव्यप्रकाशकारमते काव्यप्रयोजनानि विवृणुत।

RKMVERI/DSS-WW/MAIS/16-21/J2018/UT-1/SK-431

## SK-431 – संस्कृतसाहित्येतिहासः

कालावधिः - होरा                                                                                   पूर्णाङ्काः - 25

---

**A) अधोनिर्दिष्टेषु यथाकामं पञ्च प्रश्नान् उत्तरत।**                                    **1x5=5**

1) यास्कस्य समयः कः ?
2) ईरानीभाषा केन नाम्ना व्यवह्रियते ?
3) साहित्यपाथोनिधि ........ भवन्ति ?
4) यज्ञे सामान्यतः कति ऋत्विजः भवन्ति, के ते ?
5) छन्दः पादौ ......... ब्रह्मलोके महीयते।
6) ऋग्वेदस्य ज्यौतिषस्य नाम किम् ?
7) महाभारतस्य कानि नामानि ? तत्र कति पर्वाणि च सन्ति?

**B) प्रस्तुतेषु यथारुचि त्रीन प्रश्नान् समाधत्त।**                                    **3 x 5=15**

1) वेदार्थे त्रयीति शब्दप्रयोगः किमर्थम
2) पुराणस्य किं लक्षणम ? श्लोकमुल्लिख्य श्लोकार्थो लेख्यः।
3) की नाम वेदः ?
4) कल्पः इत्येतत् किम ?
5) ज्यौतिषाधारेण वेदानां कालः कथं ज्ञायते ?
6) कल्पस्य परिचयं लिखत।
7) रामायणस्य स्वरुपं प्रतिपादयत।

**C) निर्दिष्टयो यथाच्छन्दं एकं समाधत्त।**                                    **5 x 1=5**

1) संस्कृतस्य व्यवहारभाषात्वम् उपपादयत।
2) महाभारतम्।

RKMVERI/DSS/MAIS/16-21/J2018/UT-1/SK-441

**SK-441 – साहित्यदर्पणः**

कालावधिः - होरा | पूर्णाङ्काः - 25

---

**A) एकेन वाक्येन उत्तरत।** **1x8=8**

1) व्यञ्जनार्थे ध्वनिनिर्वचनं कथम्।
2) बाध्यतया ख्यातौ का वृत्तिः।
3) उत्तमकाव्यस्य लक्षणं किम्।
4) त्वामस्मि इत्यत्र अस्मिपदस्य कोऽर्थः।
5) गृध्रगोमायुसंवादः कुत्र वर्तते।
6) शब्दशक्तिः इत्यस्य कोऽर्थः।
7) एकप्रकारको ध्वनिः कः।
8) विवक्षितान्यपरवाच्यध्वनिः, कथं विग्रहः।
9) दर्पणकारमते काव्यं कतिप्रकारकम्।
10) निश्वासान्ध इवादर्श इत्यादिपद्यं कस्य कवेः।

**B) समासेन विवृणुत।** **3x4=12**

1) स्वतःसम्भविना वस्तुना अलङ्कारध्वनिं सोदाहरणं दर्शयत।
2) उभयशक्त्युद्भवध्वनिं सोदाहरणं निरूपयत।
3) शब्दशक्त्युद्भवध्वनिं सोदाहरणं प्रतिपादयत।
4) कविप्रौढोक्तिसिद्धेन वस्तुना वस्तुध्वनिं सोदाहरणं दर्शयत।
5) सदागमः सदागम इव सोदाहरणं उपपादयत।
6) कविनिबद्धप्रोढोक्तिसिद्धेन वस्तुना वस्तुध्वनिं सोदाहरणं वदत।

**C) एकं प्रपञ्चयत।** **1x5=5**

1) लक्षणामूलध्वनेः प्रकारद्वयं सोदाहरणं विशदयत।
2) गृध्रगोमायुसंवादेन प्रबन्धध्वनिम् आविष्कुरुत।